याम्येति। ततस्तदनन्तरम्। याम्योतरौ दक्षिणोत्तरदिगवस्थितौ। अचलस्थानकौ। ध्रुवौ। दृष्टौ। याम्योत्तरौ। द्वौ। तच्चक्राक्षौ। तदाश्रितौ। भवतः। तत्र दक्षिणाक्षो दक्षिणध्रुवाश्रित उत्तराक्ष उत्तरध्रुवाश्रितो दृष्ट इत्यर्थः॥ **१३४-१०॥**

**मध्यभागेऽस्य चक्रस्य घटीयन्त्रनिभस्य च।**
**नक्षत्रमालिका दृष्टा सर्वतोऽपि तदाश्रिता॥ ११॥**

HVSS : 134 / 11

मध्येति। घटीयन्त्रनिभस्य। अस्य। चक्रस्य। मध्यभागे। सर्वतः परितोऽपि। तदाश्रिता चक्रमाश्रित्यावस्थिता। नक्षत्रमालिकाऽश्विन्यादिभगणस्रक्। दृष्टा॥ **१३४-११॥**

**तिर्यगूर्ध्वमधस्तस्याः सकलास्तारकागणाः।**
**दृष्टास्तच्चक्र भूषार्था यथा सद्रुक्मपुष्पिकाः॥ १२॥**

HVSS : 134 / 12

तिर्यगिति। तस्या नक्षत्रमालायाः। तिर्यगुभयतः। ऊर्ध्वम्। अधः। तच्चक्रभूषार्थास्तस्य चक्रस्यालंकरणप्रयोजनाः। सद्रुक्मपुष्पिकाः शुद्धकलधौतसुवर्णपुष्पिकाः। भाषायां 'फुदडियो' इति प्रसिद्धाः। यथा। तथा। सकलाः। तारकागणास्तारासमूहाः। दृष्टाः॥ **१३४-१२॥**

**उदयास्तमयस्थानमथैकं सूर्यचन्द्रयोः।**
**ब्रह्माण्डस्थमिदं सर्वं स्वदेहेऽपीक्षितं ततः॥ १३॥**

HVSS : 134 / 13

उदयेति। अथानन्तरम्। सूर्यचन्द्रयोः। एकं प्रधानं मुख्यमित्यर्थः। उदयास्तमयस्थानम्। ईक्षितम्। चक्रगौ सूर्यचन्द्रौ यत्रोदयास्तमयौ गच्छतस्तत्स्थानं चापि दृष्टमित्यर्थः। इदमन्येषां बृहस्पत्यादिग्रहणामुपलक्षणम्। ततस्तदनन्तरम्। ब्रह्माण्डस्थम्। इदं पूर्वोक्तम्। सर्वम्। स्वदेहेऽपि। ईक्षितम्॥ **१३४-१३॥**

**क्षेत्रज्ञ आत्मा च ततस्तत्स्थोपि पुरुषोत्तमः।**
**दृष्टः सर्वा वृत्तयो मे तस्मिन्नेवाऽलगंस्तदा॥ १४॥**

HVSS : 134 / 14

क्षेत्रज्ञ इति। ततस्तदनन्तरम्। क्षेत्रज्ञः। आत्मा स्वहृदयावस्थितो जीवः। दृष्टः। तत्स्थः स्वजीवात्मन्यवस्थितः। **पुरुषोत्तमः श्रीकृष्णोऽपि। दृष्टः**। तदा। मे मम। सर्वाः। वृतयश्चक्षुरादि-सकलेन्द्रियवृत्तयः। **तस्मिन्पुरुषोत्तमे एव। अलगन् लग्ना बभूवुः॥ १३४-१४॥**

**एवं हि ते विदन्त्यज्ञा आत्मा ब्रह्म तदादितः।**
**मायापुरुषरूपेण सर्गारम्भे प्रजायते॥ १७॥**
HVSS : 136 / 17

एवमिति। **अज्ञा भगवत्स्वरूपज्ञानविमूढाः। ते आत्मज्ञानिनो भक्ताः।** एवं वक्ष्यमाणप्रकारेण। विदन्ति। **आत्मा परमात्मा श्रीकृष्णः। ब्रह्म ब्रह्मशब्दवाच्यः। अस्ति।** तद्ब्रह्म। आदितः प्रथमतः। सर्गारम्भे। मायापुरुषरूपेण। प्रजायते **॥ १३६-१७॥**

**ततस्तत्कार्यनिखिलाकृतिरूपेण जायते।**
**तदेव तत्तद्देहस्थजीवरूपेण च स्वयम्॥ १८॥**
HVSS : 136 / 18

तत इति। ततस्तदनन्तरम्। तद्ब्रह्मैव। स्वयम्। तत्कार्यनिखिलाकृतिरूपेण मायापुरुष-कार्यभूतस्थावरजङ्गमाकाररूपेण। जायते। तद्देहस्थजीवरूपेणस्थावरजङ्गमात्मकदेहावस्थित-जीवरूपेण च। जायते **॥ १३६-१८॥**

**एवं हि जानतां तेषां स्वोपास्यस्याखिलात्मनः।**
**परस्य ब्रह्मणः साक्षात्कृष्णस्याऽनवबोधतः॥ १९॥**
HVSS : 136 / 19

एवमिति। एवममुना प्रकारेण। जानताम्। तेषामात्मज्ञानिनाम्। स्वोपास्यस्य। **अखिलात्मनः सर्वान्तर्यामिणः। परस्य। ब्रह्मणः। साक्षात्कृष्णस्य।** अनवबोधतः मायापुरुषादि जीवान्तस्य कृष्णरूपेण बोधात्ततः पृथग्भूत श्रीकृष्णस्वरूपाज्ञानेनेत्यर्थः **॥ १३६-१९॥**

**अथात्मज्ञानिनां श्रेयोवर्त्मस्थितिरुदीर्यते।**
**ययैते पदवीं यायुर्निर्विघ्नं महतां सताम्॥ ३०॥**
HVSS : 136 / 30

अथेति। अथानन्तरम्। आत्मज्ञानिनाम्। श्रेयो वर्त्मस्थितिः। उदीर्यते मया कथ्यते। यया श्रेयोवर्त्मस्थित्या। एते आत्मज्ञानिनः। महताम्। सतां भगवदेकान्तिकसाधूनाम्। पदवीं भगवद्धामप्राप्तिरूपं मार्गम्। निर्विघ्नं यथातथा। यायुः **॥ १३६-३०॥**

**एवं हि सर्वरूपत्वं तस्य निश्चित्य शास्त्रतः।**
**सेव्यः कृष्णः परस्तस्मात्तदैक्यप्रापितात्मना॥ ३४॥**
HVSS : 136 / 34

एवमिति। एवममुना प्रकारेण। तस्य ब्रह्मणः। सर्वरूपत्वम्। शास्त्रतः। निश्चित्य। **तस्माद्ब्रह्मणः। परः स्वरूपस्वभावादिभिरत्युत्कृष्टः। कृष्णः साक्षाच्छ्रीहरिः। तदैक्यप्रापि-तात्मनाऽक्षरब्रह्मणासहैक्यं नीतेन स्वात्मना। सेव्य एकान्तिकभावेनोपासनीयः॥ १३६-३४॥**

**अक्षरस्यापि कृष्णस्तु कारणं चाश्रयो मतः।**
**प्रेरकश्चाऽत एवाऽसौ सर्वसेव्य उदीरितः॥ ३५॥**
HVSS : 136 / 35

अक्षरस्येति। **कृष्णः स्वयं श्रीहरिस्तु। अक्षरस्यापि। कारणमुक्तरीत्या हेतुः। आश्रय आधारः।** प्रेरको जगत्सर्गादिकार्ये नियोजकश्च। मतः। अतो हेतोरेव। असौ कृष्णः। सर्वसेव्यः। उदीरितः **॥ १३६-३५॥**

**एवं ज्ञात्वा तु ये कृष्णं ब्रह्मीभूतात्मना सदा।**
**प्रीत्या भजन्ति ते तूक्ताः प्राप्ता एव महद्गतिम्॥ ३६॥**
HVSS : 136 / 36

एवमिति। एवममुना प्रकारेण। ये आमज्ञानिनः। कृष्णम्। ज्ञात्वा। **ब्रह्मीभूतात्मना ब्रह्मभावापन्नेन स्वात्मना।** सदा। प्रीत्या। भजन्ति। ते तु। **महद्गतिं भगवदेकान्तिकप्राप्या-मक्षरधाम्नि श्रीहरिपार्षदतारूपामुत्तमगतिम्।** प्राप्ता एव। उक्ताः॥ १३६-३६॥

**निर्विघ्नमेते यांत्येव धाम मुख्यं रमापतेः।**
**ज्ञेयो वर्त्मद्वयस्येत्थं गतिभेदो मुमुक्षुभिः॥ ३७॥**

HVSS : 136 / 37

निर्विघ्नमिति। एते एवंभूताभक्ता एव। **रमापतेः श्रीहरेः। मुख्यं गोलोक-वैकुण्ठादिष्वग्र्यम्। धामाक्षरब्रह्मपदम्।** निर्विघ्नं यथातथा। यान्ति। इत्थममुना प्रकारेण। **वर्त्मद्वयस्य रसिकभक्त्यात्मज्ञानलक्षणद्विविधपथस्य गतिभेदः।** मुमुक्षुभिर्भवद्भिः। ज्ञेयः॥ १३६-३७॥

**मयाद्य प्रोच्यते यत्तन्न स्वमाहात्म्यवृद्धये।**
**न दम्भेन न मानेन किन्तु युष्मद्धिताय हि॥ ७॥**

HVSS : 146 / 7

मयेति। हे सन्तः। अद्यास्मिन्दिने मया। यद्वचः। प्रोच्यते। तत्। स्वमाहात्म्यवृद्धये। न प्रोच्यते। दम्भेन। न प्रोच्यते। किन्तु। युष्मद्धिताय सर्वेषां युष्माकं हितविधानाय। प्रोच्यते। हि॥ १४६-७॥

**अनुभूतं मयैतद्धि सर्वशास्त्रानुगामि च।**
**रहस्यमप्यतिप्रीत्या संसदीह प्रकाश्यते॥ ८॥**

HVSS : 146 / 8

अनुभूतमिति। एतद्वक्ष्यमाणम्। मया। अनुभृतम्। अस्ति। सर्वशास्त्रानुगामि सर्वशास्त्राणि यत्प्रमाणयति तथाभूतं च। अस्ति। रहस्यं सुगोप्यमपि। अतिप्रीत्या भवत्सु स्नेहेन हेतुना। इहास्याम्। संसदि सभायाम्। प्रकाश्यते विव्रियते॥ १४६-८॥

**अत्र यो मधुरः शब्दः सुस्पर्शः सुरसश्च यः।**
**सुरूपं च सुगन्धश्च भवत्यतिमनोहरः॥ ९॥**

HVSS : 146 / 9

**'सदाऽक्षरपदावासः श्रीहरिः पूरुषोत्तमः। पारोक्ष्येण स्वमाहात्म्यं स्वीयेभ्यो वदति प्रभुः। भक्तानां शिक्षणार्थाय स्वपरोक्षप्रियत्वतः। मानुष्यनाट्यशोभार्थं चरित्रं श्रीहरेरिदम्'।** अत्रेति। अत्र लोके। यः। मधुरो मनोज्ञः। शब्दः। यः। सुस्पर्शः शोभनः स्पर्शः। यः। सुरसोऽतिस्वादुरसः। यत्। सुरूपं शोभनं सौन्दर्यम्। यः। अतिमनोहरः। सुगन्धश्च भवति॥ १४६-९॥

**पञ्चस्वेतेषु मच्चित्तं क्वापि नाऽण्वपि बध्यते।**
**आस्ते तत उदासीनं शोभनाशोभने समम्॥ १०॥**

HVSS : 146 / 10

पञ्चस्थिति। एतेषु शब्दादिषु। पञ्चसु मायिकेषु। मच्चितम्। क्वापि कदाचिदपि। अण्वल्पमात्रमपि। न बध्यते। ततस्तेभ्यो विषयेभ्यः। उदासीनम्। आस्ते सर्वदा तिष्ठति। शोभनाशोभने रमणीयारमणीये मायिकपदार्थे। सममेकरूपम्। आस्ते॥ १४६-१०॥

**राजा रङ्कश्च मे तुल्यौ राज्यभिक्षाटने तथा।**
**मानापमानौ च समे वर्तेते लोष्ट काञ्चने॥ ११॥**

HVSS : 146 / 11

राजेति। राजा चक्रवर्तिनृपतिः। रङ्कोऽतिवराकश्च। मे मम। तुल्यौ समानौ। तथा। राज्यभिक्षाटने चक्रवर्तिपदे स्थित्वा सर्वप्रशास्तृत्वं करधृतकपालतया भिक्षाचरणं चेत्युभे। समे। मानापमानौ सत्कारप्रतीकारौ च। तुल्यौ। लोष्टकाञ्चने सुवर्णमृत्पिण्डौ च। समे। वर्तेते॥ १४६-११॥

**हस्त्यारोहणपद्गत्वे वर्तेते च समे मम।**
**स्रक्चन्दनांशुकाकल्पैः पूजकश्च रजःक्षिपः॥ १२॥**

HVSS : 146 / 12

हस्तीति। हस्त्यारोहणपद्गत्वे हस्त्यम्बालिकायामुपविश्य यानं पद्भ्यां यानं चेत्युभे। मम। समे। वर्तेते। स्रजः सत्पुष्पहाराश्च चन्दनान्यगुर्वादिगन्धाश्च अंशुकानि महार्हाणि महावसनादीनि वासांसि च आकल्पा रत्ननिचिताः कटककटिसूत्रकेयूरादयः सौवर्णा अलङ्काराश्च तैः। पूजको ममार्चनकर्ता जनः। रजःक्षिपो धूलिप्रक्षेपकश्च जनः। तौ। समौ। वर्तेते॥ १४६-१२॥

**भक्तेष्वपि न सर्वेषु महदल्पत्वमस्ति मे।**
**सर्वत्र समदृष्टिर्हि स्वभावादेव वर्तते॥ १३॥**

HVSS : 146 / 13

भक्तेष्विति। सर्वेष्वपि। भक्तेषु महदल्पत्वम्। मे मम। नास्ति। सर्वत्र सर्वेष्वपि भक्तेषु। स्वभावादेव सहजतयैव। समदृष्टिर्मम समतामतिः। वर्तते अस्यायं भावः। या इयं भक्तेषु महदल्पत्वनिषेधपूर्वं समतोक्तिः सा च स्वमाहात्म्यविचारे युक्तैव यथा चक्रवालगिरिमहत्त्वविचारे सदपि मेर्वादिगिरिमहदल्पत्वं तुल्यमेवास्ति न **तेनाविवेकित्वं भगवतः स्वस्य महिम्नो निरवधिकातिशयत्वादिति**॥ १४६-१३॥

**वैराग्यमतितीव्रं च सद्धर्मोस्ति ममान्तरे।**
**ब्रह्मैवास्मीति च ज्ञानं तन्महत्तापि नास्ति मे॥ १४॥**

HVSS : 146 / 14

वैराग्यमिति। मम। अन्तरेऽन्तःकरणे। अतितीव्रम्। वैराग्यम्। अस्ति। सद्धर्मो यथार्थः स्वधर्मश्च। अस्ति। अहम्। ब्रह्मैव। अस्मि। इतीत्थम्। ज्ञानं च। अस्ति। तथापि तन्महत्ता। मे मम। नास्ति। वैराग्यादिगुणानसाधारणतया मन्निष्टान्विदित्वाऽपि भगवदग्रे तेषां महत्त्वाभावात्तन्महतया नोत्सेकं व्रजामीत्यर्थः॥ १४६-१४॥

**तत्तेजःपुञ्जमध्यस्थ एवाऽद्याहं वदामि च।**
**युष्मानपि च पश्यामि निषण्णास्तत्र सर्वशः॥ २५॥**

HVSS : 146 / 25

तदिति। अहम्। अद्यास्मिन्दिने। तत्तेजःपुञ्जमध्यस्थ उक्तविधाक्षरब्रह्ममहश्चय-मध्यावस्थित एव। वदामि युष्मभ्यं कथयामि। सर्वशः सर्वान्। युष्मानपि। तत्राक्षरब्रह्मतेजसि। निषण्णानुपविष्टान्। पश्यामि॥ १४६-२५॥

**एतद्दुर्गपुराद्यं तु मया किञ्चिन्न दृश्यते।**
**एतादृशी स्थितिर्मेऽस्तीत्येवं जानीत सत्तमाः॥ २६॥**

HVSS : 146 / 26

एतदिति। मया। एतत्। दुर्गपुराद्यं दुर्गपुरोत्तमनृपदुर्गभवनबहिर्वेद्यादिकम्। किञ्चिदपि। न दृश्यते। हे सत्तमाः!। मे मम। एतादृश्येवंविधा। स्थितिर्निष्ठा। अस्ति। इत्येवम्। जानीत यूयं सत्यमेव वित्त॥ १४६-२६॥

**येन येनाऽवबुध्येत रूपमेतत्परात्मनः।**
**पुमान्स सोऽपि मद्वत्स्यान्नासक्तः क्वापि वस्तुनि॥ २७॥**
HVSS : 146 / 27

येनेति। येन। येन मद्भक्तेन। परात्मनः। श्रीकृष्णस्य। एतत्। रूपम्। अबबुध्येत्। पुमान्भक्तोऽपि। मद्वदहमिव। क्वापि कस्मिंश्चित्। वस्तुनि मायिकपदार्थमात्रे। आसक्तः न स्यात्॥ **१४६-२७॥**

**तदेव रूपं यूयं च पश्यथाऽत्रैव संसदि।**
**अपि सम्यङ्‌ न तज्ज्ञानमस्तीत्यन्यदपीक्ष्यते॥ २८॥**
HVSS : 146 / 28

तदिति। यूयं भवन्तोऽपि। अत्रास्यामेव। संसदि सभायाम्। **तदक्षरधामावस्थितमेव। रूपं श्रीकृष्णस्वरूपम्।** पश्यथ। अथापि। तज्ज्ञानं युष्मन्नयनगोचरावस्थित**साक्षाच्छ्रीकृष्ण-स्वरूपावबोधः।** सम्यग्माहात्म्यसहिततया। नास्ति। इति हेतोः। अन्यत्तत्स्वरूपेतरन्मायिकवस्त्वपि। ईक्ष्यते आसक्तिपूर्वं विलोक्यते॥ **१४६-२८॥**

**यदाज्ञास्यथ तद्रूपं यथावस्थिमञ्जसा।**
**तदा सुज्ञेया विषयाः कामाद्याश्चान्तरारयः॥ २९॥**
HVSS : 146 / 29

यदेति। यदा। यथावस्थितं यथाविधं वर्तते तथाविधम्। तद्रूपं युष्मदिष्टदेवश्रीकृष्ण-स्वरूपम्। अञ्जसा माहात्म्यसहितं यथातथा तत्त्वतः। ज्ञास्यथ। तदा। विषया मायिकाः शब्दादयोऽर्थाः। कामाद्याः। अन्तरारयोऽन्तःशत्रवश्च। सुजेयाः सम्यक्हेयाः। भविष्यन्तीति शेषः॥ **१४६-२९॥**

**यस्मिंस्तेजसि तद्रूपं भवेत्येकरसे सिते।**
**तदक्षरात्मब्रह्मादिनामभिः संप्रकीर्त्यते॥ ३०॥**
HVSS : 146 / 30

एवमुक्तिविचित्रतयाऽ**क्षरधामस्थं श्रीकृष्णं स्वमेवाभिधाय माहात्म्यबोधे सत्येव तथा तद्बोधे चोक्त्या तावतापि स्वीयैर्यथार्थतया स्वमविदितं बुध्वोक्तानुवादपूर्वं भङ्ग्यन्तरेण स्वस्वरूपं वदति।** यस्मिन्निति। हे साधवः!। एकरसे सन्मात्रे। स्वस्वरूपस्यैकरूपत्वातदिरतस्वगतभाववर्जिते इत्यर्थः। सितेऽत्युज्जवले। यस्मिन्। तेजसि। **तद्रूपं श्रीकृष्णस्वरूपम्।** भवति वर्तते। तत्तेजः। **अक्षरं च आत्मा च ब्रह्म च तान्यादयो येषां ब्रह्मपुरपरंपदादीनां तानि च तानि नामानि च तैः। सम्प्रकीर्त्यते॥ १४६-३०॥**

**यस्तत्र भगवान् साक्षात्स परब्रह्मसञ्ज्ञकः।**
**आत्मतत्त्वाभिधश्चासौ पुरुषोत्तम उच्यते॥ ३१॥**
HVSS : 146 / 31

य इति। **तत्राक्षरादिनामके तेजसि। यः। साक्षात्। भगवान्। अस्ति। सः। परब्रह्मसञ्ज्ञकः। उच्यते।** आत्मतत्त्वाभिधः। उच्यते। **असौ। पुरुषोत्तम एतन्नामा च। उच्यते॥ १४६-३१॥**

**स एव जायते धर्मस्थापनार्थं युगे युगे।**
**रामकृष्णादिसञ्ज्ञोऽत्रन्नाकृतिः श्रेयसे नृणाम्॥ ३२॥**
HVSS : 146 / 32

स इति। स परब्रह्मादिनामको भगवानेव। अत्र लोके। धर्मस्थापनार्थम्। नृणां स्वाश्रयकर्तृजनानाम्। श्रेयसे कल्याणार्थं च। युगे युगे। रामकृष्णादिसञ्ज्ञः। न्राकृतिः। जायते अनेकानवतारान् दधातीत्यर्थः ॥ १४६-३२ ॥

**मनुष्यसदृशो ह्येष न मर्त्यः पुरुषोत्तमः।**
**अत आहाक्षरं धाम पार्थसारथिरात्मनः ॥ ३५ ॥**

HVSS : 146 / 35

मनुष्येति। हि यतः। मनुष्यसदृशो मनुष्यतुल्यतया प्रतीयमानोऽपि। एषः पुरुषोत्तमः मर्त्यः केवलं मनुष्य एव। न भवति। अतो हेतोः। पार्थसारथिरर्जुनस्य सारथितया वर्तमानः श्रीकृष्णः। आत्मनः स्वस्य। अक्षरम्। धाम। आह गीतायामर्जुनं प्रति उक्तवान् ॥ १४६-३५ ॥

**न तद्भासयते सूर्यो न शशाङ्को न पावकः।**
**यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम ॥ ३६ ॥**

HVSS : 146 / 36

तदेवाह। नेति। **यद्धाम। गत्वा मदेकान्तिकोपासनया सम्प्राप्य। न निवर्तन्ते पुनरावृत्तिं न यान्ति।** ते पुनरत्र जन्ममरणप्रवाहं नानुभवन्तीत्यर्थः। तद्धाम। सूर्यः। न भासयते न प्रकाशयति। शशाङ्कश्चन्द्रः। न भासयते। **पावकोऽग्निः। न भासयते। तत्। मम। परमम्। धाम। अस्ति।** तथा च श्रुतिः। न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निस्तमेव भान्तमनुभाति सर्वं। तस्य भासा सर्वमिदं विभाती'ति ॥ १४६-३६ ॥

**ध्यायन्ति न्राकृतिं येऽत्र भगवन्तं मुमुक्षवः।**
**तेषामेवैष तेजस्वी भासतेऽक्षरधामगः ॥ ३७ ॥**

HVSS : 146 / 37

ध्यायन्तीति। अत्र लोके। मुमुक्षवः। ये भक्ताः। न्राकृतिम्। भगवन्तम्। ध्यायन्ति। तेषां ध्यातृणां भक्तानाम्। **एष न्राकृतिरेव भगवान्। अक्षरधामगः। तेजस्वी सन्। भासते** ॥ १४६-३७ ॥

**तीर्त्त्वा मायार्णवं ते च यान्ति तत्परमं पदम्।**
**तेषां कालकृतांतादिभयं नास्त्येव सर्वथा ॥ ३८ ॥**

HVSS : 146 / 38

तीर्त्त्वेति। ते तद्ध्यातारो भक्ताः। मायार्णवमर्णववद्दुस्तरां मायाम्। तीर्त्त्वाऽतिक्रम्य। तत्। **परमम्। पदमक्षरधाम।** यान्ति। तेषां तथाविधभक्तानाम्। **कालकृतान्तादिभयं कालाद्यमादेश्च भीतिः। सर्वथा। नास्त्येव** ॥ १४६-३८ ॥

*एषा वार्त्ता दृढं सर्वैर्धारणीया सदा हृदि।*
*एतां बोधयितुं सम्यङ्ममैवेदं जनुर्नृषु* ॥ ६१ ॥

HVSS : 146 / 61

प्रकरणार्थं निगमयति त्रिभिः। एषेति। हे सन्तः!। एषा। वार्ता। सर्वैर्भवद्भिः। हृदि स्वस्वमनसि। दृढं यथातथा। सदैव। धारणीया। **एतां वार्ताम्। सम्यक्। बोधयितुं युष्मान्सर्वान् ज्ञापयितुमेव। नृषु इदम्। मम। जनुर्जन्मास्ति** ॥ १४६-६१ ॥

**भूरितेजसि यः प्रोक्तो भगवान् दिव्यविग्रहः।**
*सोऽहमेव भवाम्यत्र स्थितो दिव्यनराकृतिः* ॥ ६२ ॥

HVSS : 146 / 62

भूरीति। भूरितेजसि अत्र पूर्वमभिहितेऽक्षरब्रह्मरूपप्राज्यतेजसि। **दिव्यविग्रहः। यः। भगवान्। प्रोक्तः। स भगवान्। अत्र लोके। स्थितः। दिव्यनराकृतिः। अहमेव। भवामि ॥ १४६-६२ ॥**

*रामकृष्णादयः सर्वेऽवताराः संत्यतो हि मे।*
**पुरुषोत्तमस्य वित्तेत्येतत् सत्यं ब्रवीमि वः ॥ ६३ ॥**

HVSS : 146 / 63

रामेति। अतो हेतोः। रामकृष्णादयः। **सर्वे। अवताराः। पुरुषोत्तमस्य। मे मम। सन्ति।** हि। इतीत्थम्। वित्त यूयं जानित। अहम्। वो युष्मभ्यम् एतत् सत्यं यथार्थमेव। ब्रवीमि ॥ **१४६-६३ ॥**

**ज्ञातुमित्थं न शक्येत यदि कैश्चन तर्हि तैः।**
**ज्ञेयस्तदेकद्रष्टाऽहं तेनापि स्याद्रतिर्मयि ॥ ६४ ॥**

HVSS : 146 / 64

ज्ञातुमिति। इत्थममुना प्रकारेण। यदि। कैश्चनैतत्सभानिषण्णैर्यथार्थतया मत्स्वरूपानभिज्ञैः कैश्चिज्जनैः ज्ञातुम्। न शक्येत। तर्हि। तैर्जनैः। अहम्। तदेकदृष्टा तस्य भगवतः स्वरूपस्य यथार्थतयाऽनन्यसमीक्षकः। ज्ञेयः। तेन तथाविधेन मत्स्वरूपज्ञानेनापि। मयि। रतिः प्रीतिः। स्यात् ॥ **१४६-६४ ॥**

**सर्वसच्छास्त्रसिद्धान्तो वार्त्तैषाऽस्ति मया कृता।**
**साक्षात्स्वेनाऽनुभूतैव ततो नास्त्यत्र संशयः ॥ ६७ ॥**

HVSS : 146 / 67

सर्वेति। मया। कृता। **एषा। वार्ता। सर्वसच्छास्त्रसिद्धान्तः। अस्ति। स्वेन मया। साक्षात्प्रत्यक्षतया। अनुभूतैव।** अस्ति। ततो हेतोः। अत्रास्यां वार्तायाम्। संशयः। नास्ति ॥ **१४६-६७ ॥**

**शृण्वन्तु सादरं सर्वे कुर्वे वार्त्तां हिताय वः।**
**मया व्यासकृता ग्रन्थाः सर्वे सम्यक् श्रुता इह ॥ ४ ॥**

HVSS : 154 / 4

शृण्वन्त्विति। हे साधवः!। वो युष्माकं। हिताय हितं कतुम्। वार्ताम्। कुर्वे। सर्वे भवन्तोऽखिला अपि। सादरं यथातथा। शृण्वन्तु। मया। व्यासकृताः। सर्वे ग्रन्थाः। इह दुर्गपुरे। सम्यक्। श्रुताः ॥ **१५४-४ ॥**

**अद्य वा लक्षवर्षान्ते पुमान्वेत्स्यत्यमुं यदा।**
**तदैव संसृतेर्मोक्षो भविष्यति न चान्यथा ॥ १३ ॥**

HVSS : 154 / 13

अद्येति। पुमान्। अद्य। अथवा। लक्षवर्षान्ते। यदा। अभुम्। सिद्धान्तम्। वेत्स्यति ज्ञास्यति। तदैव। संसृतेः संसारात्। मोक्षः। भविष्यति। अन्यथैनत्सिद्धान्तवेदनं विना। न च संसृतेर्मोक्षो न भविष्यत्येव ॥ **१५४-१३ ॥**

**महतां नारदादीनां विधायापि समागमम्।**
**अयमेवास्ति वेद्यो वै वेद्यं यत्ते ब्रुवंत्यमुम् ॥ १४ ॥**

HVSS : 154 / 14

महतामिति। महतां महानुभावानाम्। नारदादीनां साक्षाद्भगवदेकान्तिकभक्तानाम्। समागमे प्रसङ्गम्। विधायापि। अयं सिद्धान्त एव। वेद्य: यस्माद्धेतो:। ते नारदादयोऽपि। अमुं सिद्धान्तमेव। वेद्यं सर्वथा ज्ञेयम्। ब्रुवन्ति अनेकयुक्तिभि: स्वाश्रितेभ्य: कथयन्ति ॥ १५४-१४ ॥

**प्रत्यक्षकृष्णतद्भक्तमाहात्म्यज्ञानमस्ति यत्।**
**यस्य तत् सुदृढं तस्य क्वापि पातभयं न हि॥ १५॥**

HVSS : 154 / 15

प्रत्यक्षेति। यत्। प्रत्यक्षकृष्ण: साक्षात्परमेश्वरश्च तद्भक्ता: प्रत्यक्षकृष्णैकान्तिकजनाश्च तेषां माहात्म्यज्ञानं परोक्षवन्महिमवेदनम्। तत्। यस्य भक्तस्य। सुदृढम्। अस्ति। तस्य भक्तस्य। क्वापि कदाचिदपि। देशकालादिवैषम्ये सत्यपीत्यर्थ:। पातभयं मोक्षमार्गात्पत्तनभयम्। नहि नास्त्येव। यथा केपांचिदास्तिकजनानां स्वपरोक्षभूतरामकृष्णादिभगवदवताराणां समहिमचरित्रश्रवणेन तद्भक्तानां हनुमदुद्धवादीनां समहिमचरित्रश्रवणेन चात्युत्साहयुक्तत्वं महाश्चर्ययुक्तत्वं च जायते तथैव प्रत्यक्षभगवतस्तद्भक्तानां च प्राप्तौ सत्यां तेषां समाहात्म्यचरित्रश्रवणेन यदा तथात्वं स्वात्तदैवात्यन्तिकमोक्षप्राप्ति: संसृतिकालभयनिवृत्तिश्च स्वादित्येतावत्सन्दर्भार्थ: ॥ १५४-१५ ॥

**न जायन्ते सृष्टिभोगरूपां जीवेश्वरास्तदा।**
**न कुर्वन्ते च सङ्कल्पैः सृष्टिं भोगैश्च तत्र ते॥ २३॥**

HVSS : 154 / 23

नेति। हे साधव:!। तदा स्वप्नावस्थायाम्। जीवेश्वरा:। सृष्टिभोगरूपा:। न जायन्ते। किञ्च। ते जीवेश्वरा:। तत्र स्वप्नावस्थायाम्। सङ्कल्पै: स्वमानसकर्मभि:। सृष्टिम्। भोगांश्च। न कुर्वते ॥ १५४-२३ ॥

**ईदृगेवास्ति तत्स्थानमीश्वरेण विनिर्मितम्।**
**ज्ञानिनः कृष्णभक्ता ये ते तज्जानन्ति नेतरे॥ २७॥**

HVSS : 154 / 27

ईदगिति। तत्स्थानं कण्ठस्थानम्। ईश्वरेण श्रीहरिणा। ईदगेवंविधमेव। विनिर्मितम्। अस्ति। तदेवंविधार्थे एवंविधस्थान प्राधान्यम्। ज्ञानिन एकान्तिका:। ये। कृष्णभक्ता:। ते जानन्ति। इतरे तदन्यजना:। न जानन्ति ॥ १५४-२७ ॥

**जानामि त्वामहं धूर्त न हि त्वां गणयाम्यहम्।**
**त्वद् बिभेमि न वै किञ्चिन्नियन्तास्मि तव ध्रुवम्॥ २५॥**

HVSS : 155 / 25

तदाह द्वाभ्याम्। जानामिति। हे मन:!। अहम्। त्वाम्। धूर्तं वञ्चकम्। जानामि। अहम्। त्वाम्। न गणयामि। त्वद्भवत: सकाशात्। किञ्चिल्पमात्रामपि। न विभेमि तव। नियन्ता नियामक:। ध्रुवमेव। अस्मि ॥ १५५-२५ ॥

**यदि कार्ष्णं विनाऽन्यं त्वं सङ्कल्पमणुमात्रकम्।**
**अपि कर्ता तर्हि त्वां चूर्णयिष्यामि तत्क्षणम्॥ २६॥**

HVSS : 155 / 26

यदीति। त्वम्। यदि। कार्ष्णं कृष्णसम्बन्धिनम्। सङ्कल्पम्। विना। अणुमात्रकमपि। अन्यं तदितरं सङ्कल्पम्। कर्ता करिष्यसि। तर्हि तु। त्वाम्। तत्क्षणमं सङ्कल्पाचरणक्षय एव। चूर्णयिष्यामि ॥ १५५-२६ ॥

**एवमेव मया बुद्धिं चित्तं चाहंकृतिं प्रति।**
**निर्भयं वाक्यमुदितं वर्तिताः स्ववशे च ते॥ २७॥**

HVSS : 155 / 27

एवमिति। हे साधवः!। एवमुक्तप्रकारेणैव। मया। बुद्धिम्। चितम्। अहङ्कृतिर्महङ्कारं च प्रतिं। निर्भयम्। वाक्यम्। उदितम्। ते मनःप्रभृतयो धूर्ताः। स्ववशे स्वाधीनत्वे। वर्तिताः **॥ १५५-२७॥**

***अहमक्षरधामेश ईशेशः पुरुषोत्तमः।***
***सर्वावतारहेतुश्च सदा सर्वोपरि स्थितः॥ २४॥***

HVSS : 168 / 24

एतदेव स्पष्टमाह द्वाभ्याम्। अहमिति। अहम्। **अक्षरधामेशः सर्वपरात्युत्कृष्टाक्षर-धामाधिपतिः। ईशेशो महापुरुषादीश्वरेश्वरः। पुरुषोत्तमः। सर्वावतारहेतुः रामकृष्णादिक-सकलावताराणां कारणम्। सदा सर्वकालम्। सर्वोपरि। स्थितश्च। मत्तः परतरः कोऽप्यधिको नास्तीत्यर्थः॥ १६८-२४॥**

**महापुरुषमायादेर्नियन्ता दिव्यविग्रहः।**
**आविर्भूतोऽस्मि कृपया तत्कार्या मदुपासना॥ २५॥**

HVSS : 168 / 25

महेति। महापुरुषमायादेर्महापुरुषमहामायाकालादीनामित्यर्थः। नियन्ता नियामकः। दिव्यविग्रहः सदैवातिरमणीयमूर्तिः। कृपया स्वाभाविकनिष्कारणापारकरुणया। आविर्भूतः युष्मन्नयनगोचरतां प्राप्तः। अस्मि। तत्ततोहेतोः। मदुपासना धर्मसहिता मद्भक्तिः। कार्या। इति द्वयोरेकान्वयः **॥ १६८-२५॥**

***मच्चरित्राणि गेयानि श्रोतव्यानि च सादरम्।***
***मम ध्यानं विधातव्यं स्मर्तव्या मत्कृतोत्सवाः॥ २६॥***

HVSS : 168 / 26

स्वभक्तिविधानप्रकारमाह द्वाभ्याम्। मदिति। मच्चरित्राणि दृष्टश्रुता मल्लीलाः। सादरम्। गेयानि कीर्तनीयानि। भवद्भिरिति। भवद्भिरितिशेषः। सादरम्। श्रोतव्यानि च। मम। ध्यानं समग्रतयैकैकावयवतया च मन्मूर्तिर्चिन्तनम्। सादरम्। विधातव्यम्। मत्कृतोत्सवाः मया तत्र तत्र पुरग्रामादिषु कृता जन्माष्टम्यन्नकूटपुष्पदोलादयो महाः। सादरम्। स्मर्तव्याश्चिन्तनीयाः **॥ १६८-२६॥**

**एकैकरोम्णि कृष्णस्य तव ब्रह्माण्डकोटयः।**
**केन प्रकारेण विभो वर्तन्ते सकला अपि॥ ४॥**

HVSS : 175 / 4

एकेति। हे विभो!। क्षराक्षरादिप्रशासनसमर्थ। कृष्णस्योपनिषद्गीताऽनादिकृष्णनाम्नः। तव हरेः। एकैकरोम्णि। सकलाः। अपि। ब्रह्माण्डकोटयः। केन प्रकारेण वर्तन्ते **॥ १७५-४॥**

**तत्र कृष्णः स्वयं त्वं च नैकरूपैः कथं स्थितः।**
**तन्मे ब्रूहीति सम्पृष्टस्तेनोवाच सतां पतिः॥ ५॥**

HVSS : 175 / 5

तत्रेति। तत्र तासु ब्रह्माण्डकोटिषु विषये। स्वयम् कृष्णः। त्वम्। नैकरूपैरनेकैः स्वरूपैः। कथं केन प्रकारेण। स्थितोऽसि। तदेतत्। मे मह्यम्। ब्रूहि। इत्यमुना प्रकारेण। तेन भगवदान्दसाधुना। सम्पृष्टः। सतांपतिः। श्रीहरिः। उवाच **॥ १७५-५॥**

**अहमेवादितो वच्मि स्वकमंगमशेषतः।**
**बाल्येऽपि रुचिरभूत्प्रातः स्नाने सुरेक्षणे॥ ७॥**
HVSS : 188 / 7

स्वस्वाङ्गोक्तौ विलम्बं कुर्वतस्तानालक्ष्य तेषा शिक्षामिपादादौ स्वयमेव स्वकीयं तद्वक्ति। अहमिति। हे साधवः!। आदितः। अहमेव। स्वकम्। अङ्गम्। अशेषतः। सर्वप्रकारेण। वच्मि। मे मम। वाल्येऽपि। प्रातःस्नाने। सुरेक्षणे। रामकृष्णादिदेवदर्शने। रुचिः। अभूत्॥ १८८-७॥

**कथावार्त्ताश्रुतौ विष्णोः साधूनां च समागमे।**
**प्रीतिश्च तीर्थयात्रायां ममावर्तत सर्वदा॥ ८॥**
HVSS : 188 / 8

कथेति। विष्णोः श्रीकृष्णस्य। कथावार्ताश्रुतौ। साधूनाम्। समागमे। तीर्थयात्रायां च। मम। सर्वदा। प्रीतिः। अवर्तत॥ १८८-८॥

**गृहं हित्वा यदा चाहं वनमभ्यागतस्तदा।**
**नासीद्वस्त्रैकखण्डस्याप्युपादाने रुचिर्मम॥ ९॥**
HVSS : 188 / 9

गृहमिति। अहम्। यदा। गृहम्। हित्वा। वनम्। अभ्यागतः प्राप्तः अभूवम्। तदा। वस्त्रैकखण्डस्यैकस्यापि वस्त्रशकलस्य। उपादाने ग्रहणेऽपि मम। रुचिः। नासीत्॥ १८८-९॥

**सर्पशार्दूलभूतादिभयं त्वासीन्न मे हृदि।**
**गहनेऽपि वने स्वस्थो न्यवसं हि दिवानिशम्॥ १०॥**
HVSS : 188 / 10

सर्पेति। गहने दुःखरूपे। 'गहनं वनदुःखयो' रितिहेमः। वने काननेऽपि। सर्पा अजगरादयो भुजङ्गाश्च शार्दूला व्याघ्राश्च भूताश्च ते आदयो येपां मृत्युहेतुवनमहिपक्रोडकर्यादीनां तेभ्यो भयं भीतिस्तु। मे मम। हृदि। नासीत्। अद्रम्। दिवाशिम्। स्वस्थः स्थिरचितः सन्। न्यवसं तत्र निवासमकरवम्। हि॥ १८८-१०॥

**तीर्थानि विचरन्भूमौ श्रीरामानन्दसद्गुरोः।**
**समीपमेत्य न्यवसं तच्छुश्रूषानुरागवान्॥ ११॥**
HVSS : 188 / 11

तीर्थानीति। भूमौ। तीर्थानि। विचरन्। अहम्। श्रीरामानन्दसद्गुरोः। समीपम्। एत्य प्राप्य। तच्छुश्रूपानुरागवन्। सन्। न्यवसम्॥ १८८-११॥

**मयि धर्मधुरां न्यस्य तस्मिन्नंतर्हिते भुवः।**
**सत्सङ्गिनो जनान्धर्मे वर्तयामि यथोचितम्॥ १२॥**
HVSS : 188 / 12

मयीति। तस्मिन् श्रीरामानन्दसद्गुरौ। मयि विषये। धर्मधुराम्। न्यस्यारोप्य। भुवः पृथिव्याः सकाशात्। अन्तर्हिते सति। सत्सङ्गिन्। जनान्। यथोचितम्। धर्मे। वर्तयामि॥ १८८-१२॥

**सम्प्राप्तो महदैश्वर्यं सेव्यमानोऽपि लक्षशः।**
**शिष्यै राजोचितद्रव्यैर्न लभे क्वापि विक्रियाम्॥ १३॥**
HVSS : 188 / 13

सम्प्राप्त इति। अहम्। महत्। ऐश्वर्ये सकलनृपादिमाननीयतापूर्वकसर्वप्रशास्तृतारूप-मीश्वरभावम्। सम्प्राप्तः। लक्षशो नियुतादिसङ्ख्यैः। शिष्यैः। राजोचितद्रव्यैः। सेव्यमानः। सन्नपि। क्वापि कस्मिंश्चिदपि पदार्थे। विक्रियां तदासक्तिरूपं विकारम्। न लभे॥ १८८-१३॥

**सम्पादितेष्वादरेण प्रियेषु निखिलेष्वपि।**
**औदासीन्यं पदार्थेषु म्रियमाणस्य नुर्यथा॥ १४॥**

HVSS : 188 / 14

सम्पादितेष्विति। यथा। म्रियमाणस्य मरणकाले आस्तरणसंशायितस्य। नुर्जनस्य। आदरेण। सम्पादितेषु। प्रियेषु। निखिलेष्वपि। पदार्थेषु। औदासीन्यम्। जायते॥ १८८-१४॥

**तस्मिन् यथा वा पुरुषे तदीयसुहृदामपि।**
**स्वार्थसम्पादनस्येच्छा सम्यगेव निवर्तते॥ १५॥**

HVSS : 188 / 15

तस्मिन्निति। यथा वा। तदीयसुहृदामपि। तस्मिन्म्रियमाणे। पुरुषे जनेऽपि। स्वार्थसम्पादनस्य। इच्छा। सम्यगेव। निवर्तते॥ १८८-१५॥

**तथा सर्वपदार्थानां सम्बन्धेऽपि सदा मम।**
**औदासीन्यमनिच्छा च वर्तते हृदये ननु॥ १६॥**

HVSS : 188 / 16

तथेति। तथा तेन प्रकारेणैव। मम। सर्वपदार्थानाम्। सम्बन्धे सत्यपि। हृदये। औदासीन्यमनासक्तिः। अनिच्छा तदुपादानेच्छाऽभावश्च। वर्तते। ननु। इति त्रयाणामेकसम्बन्धः॥ १८८-१६॥

**यथा वा सुत एकः स्यात्सम्राजः सोऽस्य वार्द्धके।**
**म्रियेत चेत्तदास्य स्यादौदासीन्यं हि सर्वतः॥ १७॥**

HVSS : 188 / 17

यथेति। यथा वा। सम्राजश्चक्रवर्तिनो राज्ञः। एकः। सुतः। स्यात्। अस्य सम्राजः। वार्द्धके वृद्धत्वे। स एक एव सुतः। चेद्यदि म्रियेत। तदा। अस्य सम्राजः। सर्वतः सर्वेष्वपि पदार्थेषु। औदासीन्यं पुत्रशोकाकृष्टचितत्वेनानासक्तम्। स्यात्। हि॥ १८८-१७॥

**तथा मे खाद्यपेयाश्वारोहणादिक्रियास्वपि।**
**औदासीन्यं सदास्त्येव कृष्णाकृष्टांतरत्वतः॥ १८॥**

HVSS : 188 / 18

तथेति। तथा तेन प्रकारेणैव। मे मम। कृष्णाकृष्टान्तरत्वतः श्रीकृष्णस्वरूप-सदेक्षणाकृष्टमानसभावाद्धेतोः। खानं नानाविधान्नाशनं च पानं जलादिपीतिश्च अश्वारोहणमनर्घ्यवाहाधिरोहश्च तान्यादयो यासु ताश्च क्रियास्तास्वपि। सदा। औदासीन्यमेव। अस्ति। इति द्वयोरेकसम्बन्धः॥ १८८-१८॥

**मायिकास्तु पदार्था मे नश्वरा भान्ति सर्वदा।**
**शुभोऽयमशुभश्चेति पृथगव्यक्तिर्न तत्र च॥ १९॥**

HVSS : 188 / 19

मायिका इति। मायिकाः। पदार्थास्तु। मे मम। सर्वदा। नश्वराः। भान्ति। तत्र मायिकपदार्थेषु। मध्ये। अयं पदार्थः। शुभ उत्तमत्वाद्रमणीयः। अयम्। अशुभः कुत्सितत्वादरमणीयश्च। इतीत्थम्। पृथक्। व्यक्तिर्विवेकः। नास्तिः॥ १८८-१९॥

**इदं शुभमिदं नेति यथा कक्षजरोमसु।**
**भेदो नास्ति समानत्वात्सर्वेषां हि तथाऽत्र च॥ २०॥**

HVSS : 188 / 20

तत्र पृथग्व्यक्तभावं दृष्टान्तेन स्पष्टयति। इदमिति। यथा। कक्षजरोमसु बाहुमूलोद्भूतलोमसु। इदं रोम। शुभम्। इदं रोम शुभं। नास्ति। इत्येवम्। भेद: सर्वेषां कक्षस्थरोम्णाम्। समानत्वाद्रोमत्वेन तुल्यत्वात्। नास्ति। तथा। अत्र चैपु मायिकपदार्थेष्वपि। नश्वरत्वेन सर्वेषां समानत्वाच्छुभाशुभभेदो नास्ति॥ **१८८-२०॥**

**यदित्यहं क्वचिद्वच्मि भोज्यमेतत्सुशोभनम्।**
**वस्त्रं च भूषणं वेश्मवाहयानासनादिकम्॥ २१॥**

HVSS : 188 / 21

ननु यदि ते सर्वसमानत्वं कथं तर्हि स्वभक्तार्पितांस्तान्प्रशंससीतिचेत्तत्राह द्वाभ्याम्। यदिति। एतत्। भोज्यं भोजनार्हमन्नादिकम्। वस्त्रम्। भूषणम्। वेश्म गृहं च। वाहोऽश्वश्च यानं रथादिवाहनं च आसनं पर्यङ्कादिविष्टरश्च तान्यादयो यस्य तत्। सुशोभनम्। अस्ति। इतीत्थम्। अहम्। क्वचित्कदाचित्। यत्। वच्मि। तत्त्वित्युत्तरेण सम्बन्ध: **॥ १८८-२१॥**

**तत्तु तत्तद्भक्ततुष्ट्यै बाह्यतो वच्मि नान्यथा।**
***भक्तार्थाऽस्ति क्रिया सर्वा मम स्वार्था तु कापि न*॥ २२॥**

HVSS : 188 / 22

तदिति। ततु। तत्तद्भक्ततुष्ट्यै तेषां तेषां भोज्याद्यर्पकभक्तानां प्रीणनार्थम्। बाह्यत उपरिष्टात्। वच्मि। अन्यथा। न। ममान्तरे सुशोभनं ज्ञात्वा न वच्मीत्यर्थ:। मम। सर्वा। क्रिया। भक्तार्था स्वभक्तप्रीणनप्रयोजना। अस्ति। स्वार्था तु। कापि क्रिया। नास्ति **॥ १८८-२२॥**

**ममापि कृष्णभक्त्युत्थं सुखं यत्तत्सुखं मतम्।**
**सांसारिकं सुखं यत्तद्दु:खमेवाऽखिलं ननु॥ १३॥**

HVSS : 216 / 13

ममेति। कृष्णभक्त्युत्थं श्रीकृष्णस्वरूपध्यानजम्। यत्। सुखम्। तदेव मयाऽपि। सुखम्। मतम्। यत्। सांसारिकं मायिकम्। सुखमस्ति। अखिलम्। दु:खमेव। मतम्। ननु **॥ २१६-१३॥**

**ऐश्वर्यदर्शनेनाऽत आढ्यादीन्नैव कारये।**
**सत्सङ्गं किन्तु सहजवृत्त्यैवाहं न चाग्रहात्॥ १४॥**

HVSS : 216 / 14

ऐश्वर्येति। अतोहेतो:। ऐश्वर्यदर्शनेन समाधिविधापनाद्यैश्वर्यप्रदर्शनेन। आढ्यादीन् जनान्। अहम्। सत्सङ्गम्। नैव कारये। किन्तु। सहजवृत्त्यैव कारये। आग्रहात्। न च नैव कारये **॥ २१६-१४॥**

**अन्यच्च वच्मि युष्मभ्यं लग्नं यत्रास्ति मे मन:।**
**सदैव सानुसन्धानं शृणुतार्थांस्तु पञ्च तान्॥ ८॥**

HVSS : 253 / 8

अन्यदिति। किञ्च। हे साधव:! अन्यतिरदपि हितवचनम्। युष्मभ्यम्। वच्मि। किं तदित्यत्राह। यत्र येषु पञ्चार्थेषु। मे मम। मन:। लग्नमत्यासक्तं सत्। सदैव। सानुसन्धानं तत्स्मृतिसहितम्। अस्ति वर्तते। तान्। पञ्च। अर्थान् कार्याणि। शृणुत **॥ २५३-८॥**

**क्रियासु क्रियमाणासु सर्वास्वपि च सर्वदा।**
**देहस्थितिः क्षणमपि भवितेति न वेद्म्यहम्॥ ९ ॥**

HVSS : 253 / 9

क्रियास्विति। सर्वासु। क्रियासु दैहिकीषु। सर्वदा। क्रियमाणासु सतीषवपि। देहस्थितिर्देहावस्थानाम्। क्षणमपि। भविता। इतीत्थम्। अहम्। न वेद्मि॥ २५३-९ ॥

**गतो देहागतोऽद्यैवेत्येवं जानामि तत्त्वतः।**
**वैराग्यरूप इत्येको भवत्यर्थो मनोगतः॥ १० ॥**

HVSS : 253 / 10

एतदेव स्पष्टमाहार्द्धेन। गत इति। देहः। अद्यास्मिन्क्षणे एव। गतः। गतः। इत्येवम्। तत्त्वतः। जानामि। इत्येवंविधः। वैराग्यरूपः। मनोगतः। एकः। अर्थः। भवति॥ २५३-१० ॥

**वपुषा क्षणिकेनापि कर्मैतावत्तु शोभनम्।**
**संसाधितमथैतावत्साध्यमस्ति स्वशक्तितः॥ ११ ॥**

HVSS : 253 / 11

वपुषेति। क्षणिकेन क्षणविनाशिनाऽपि। वपुषाऽनेन देहेन। एतावदेतत्परिमितम्। शोभनं भगवत्प्रसन्नताहेतुत्वात्समीचीनम्। कर्म तु। संशाधितम्। अथ च। एतावत्। शोभनं कर्म। स्वशक्तिः। साध्यम्। अस्ति। इत्युत्तरेण सम्बन्धः॥ २५३-११ ॥

**विप्रत्वादिर्न तस्यास्ति जातिः कापि च कस्यचित्।**
**स पुत्रो न पिता नापि न बन्धुर्न पतिश्च वा॥ १२ ॥**

HVSS : 262 / 12

एवं सामान्यत आत्मनिष्ठास्वरूपमुक्त्वा तामेव पुनर्विशेषत आह पञ्चभिः। विप्रत्वेति। तस्योक्तविधस्यात्मनः। विप्रत्वादिः। कापि। जातिः। नास्ति। स आत्मा। कस्यचित्। पुत्रः। नास्ति। सः। कस्यचित्। पिता। नास्ति। सः। कस्यचित्। बन्धुरपि। नास्ति। सः। कस्यचित्। पतिर्वा। नास्ति॥ २६२-१२ ॥

**कालो माया च यमराडंतकाद्याश्च सर्वदा।**
**ततो भीतास्तदाज्ञायां वर्त्तन्ते किंकरा इव॥ ४१ ॥**

HVSS : 262 / 41

काल इति। कालः। माया च। यमराड् वैवस्वतः। अन्तकाद्या मृत्युप्रमुखाः सर्वे च। किङ्करा दासा इव। ततः श्रीहरेः सकाशात्। भीताः सन्तः। तदाज्ञायां श्रीहरिनिदेशे सर्वदा। वर्तते॥ २६२-४१ ॥

**स्वबुद्धिकल्पिता नेयं**
**स्वप्रौढिख्यापनाय वा।**
**केवलं शास्त्रदृष्टा या वार्ता न कथिता मया॥ ६१ ॥**

HVSS : 262 / 61

स्वेति। मया। इयम्। वार्ता। स्वबुद्धिकल्पिता। न कथिता। यथा वैतण्डितानामिवेति भावः। अथवा। स्वप्रौढिख्यापनाय स्वोत्कर्षज्ञापयितुमित्यर्थः। न कथिता। अथवा। केवलम्। शास्त्रदृष्ट्या। न कथिता यथा पण्डितैरिवेतिभावः॥ २६२-६१ ॥

**किन्तु स्वकीयानुभवसिद्धैवोक्ता यथातथम्।**
**अतोऽस्ति सप्रमाणेति धार्या मनसि मामकैः॥ ६२ ॥**

HVSS : 262 / 62

किन्त्विति। किन्तु। स्वकीयानुभवसिद्धैव। यथातथं यथार्थतया। उक्ता। अतो हेतोः। सप्रमाणाऽनुभवप्रमाणसहिता। अस्ति। इति हेतोः। मामकैमैदाश्रितैर्भवद्भिः। मनसि धार्या। इति द्वयोरेकसम्बन्धः ॥ २६२-६२ ॥

**स्त्री - धन - ग्राम - नगर - राजार्ह - विषयै - र्भृशम्।**
**योगेऽपि तेष्वनासक्तिर्वर्त्तते चारुचिर्मम ॥ ६३ ॥**

HVSS : 262 / 63

स्वानुभवदर्शयन्नुक्तार्थमनुवदति द्वाभ्याम्। स्त्रीति। स्त्री धन ग्राम नगर राजार्हविषयैः सह। भृशमतिशयिते। योगे सम्बन्धे सत्यपि। तेषु स्त्रीधनादिषु। मम। अनाशक्तिः वर्तते। अरुचिस्तदासक्तेष्वप्रीतिश्च। वर्तते ॥ २६२-६३ ॥

**गायनं क्रियते यर्हि भवद्भिर्मम सन्निधौ।**
**तदा मयैकाग्रहृदा कृष्ण एव विचिन्त्यते ॥ २१ ॥**

HVSS : 26 / 21

गायनमिति। भवद्भिः। यर्हि। मम। सन्निधौ समीपे। गायनं कीर्तनगानम्। क्रियते। तदा तर्हि। मया। एकाग्रहृदा अव्यग्रेण मानसेन। कृष्ण एव। विचिन्त्यते ॥ २६-२१ ॥

**कर्त्तुं तत्रांतरायं तु नैव शक्नोति कश्चन।**
**ईदृग्बलिष्ठो हृदये विचारो वर्त्तते मम ॥ २२ ॥**

HVSS : 26 / 22

कर्तुमिति। तत्र श्रीकृष्णचिन्तने अन्तरायं विघ्नम्। कर्तुं तु। कश्चन कोऽपि मायिकपदार्थः। नैव। शक्नोति। ईदृगेवंविधः। बलिष्ठोऽतिबलवान्। विचारः। मम। हृदये मानसे। वर्तते ॥ २६-२२ ॥

**नास्त्येषणा मे पञ्चानां विषयाणां हृदि क्वचित्।**
**अनिच्छया बलात्प्राप्तांस्तान्नैव गणयाम्यहम् ॥ ८ ॥**

HVSS : 166 / 8

नेति। मे मम। हृदि। पञ्चानाम्। विषयाणां मायिकार्थानाम्। एषणा प्राप्तीच्छा। क्वचित्कदाचिदपि। नास्ति। अनिच्छया यदृच्छातः। बलात्। प्राप्तान्। तान्विषयान्। अहम्। नैव गणयामि तदुपादानादरं न करोमि तांस्तुच्छानेव वेद्मीति यावत् ॥ १६६-८ ॥

**जन्मतोऽद्य दिनं यावत्स्वप्नेपि मम कर्हिचित्।**
**न हि स्त्रीद्रव्यसम्बन्धिभोगसङ्कल्पसम्भवः ॥ ९ ॥**

HVSS : 166 / 9

जन्मत इति। जन्मतो मत्प्रादुर्भावदिनमारभ्य। यावत्। अद्य दिनम्। एतद्दिनपर्यन्तमित्यर्थः। मम। स्वप्ने। अपि शब्दाज्जाग्रति च। कर्हिचित्कदाचिदपि। स्त्रीद्रव्यसम्बन्धिभोगसङ्कल्पसम्भवः। नहि नास्त्येव ॥ १६६-९ ॥

**रामानन्दस्वामि - पार्श्वागमनात्पूर्वमप्यहम्।**
**साक्षादपश्यं स्वात्मानं पश्याम्यद्य च सूर्यवत् ॥ ६ ॥**

HVSS : 168 / 6

आद्यश्रेयसोऽतिदुष्करत्वमेव स्वभक्तशिक्षार्थं स्वोदाहरणकथनपूर्वं द्रढयति षड्भिः। रामानन्देति। अहम्। रामानन्दस्वामिपार्श्वागमनात्। पूर्वमपि। स्वात्मानम्। सूर्यवदर्कमिव प्रकाशमयम्। साक्षात्। अपश्यम्। अद्येदानींतनकालेऽपि। साक्षात्पश्यामि ॥ १६८-६ ॥

इद्रियाणां च सर्वासु क्रियास्वपि तमेव हि।
पश्याम्यहं क्षणमपि नास्ति तद्विस्मृतिः क्वचित्॥ ७॥
HVSS : 168 / 7

इन्द्रियाणामिति। किञ्च। अहम्। इन्द्रियाणाम्। सर्वासु दर्शनश्रवणादिकासु। क्रियास्वपि। तं स्वात्मानमेव। पश्यामि। क्षणमणुमात्रकालमपि। तद्विस्मृतिः स्वात्मस्वरूपविस्मरणम्। क्वचित्कदाचिदपि। नास्ति॥ १६८-७॥

## आदि आचार्य रघुवीरजी महाराज, श्रीहरिलीलाकल्पतरु

**सर्वाविर्भावकारण।** 1/12/1, 1/29/8, 3/18/22

**सर्वाविर्भावहेतुः...** 9/23/28

**सर्वेषामवताराणां कारणम्** 2/1/71, 2/8/24, 2/8/35, 2/47/38, 7/33/39, 2/1/71, 2/38/24, 2/58/28, 2/58/49, 50, 8/10/1, 8/11/20, 8/10/20, 8/11/58, 8/49/39, 8/50/9, 10/1/28, 11/5/34, 11/28/53, 11/30/7, 11/64/11

**तं कृष्णाद्यवताराणां बुद्ध्वा परमकारणम्।** 2/64/41

**श्रीपुरुषोत्तमस्य सर्वावतारोदयकारणस्य स्वतन्त्रमूर्त्तेः।** 5/20/14

**सर्वावतारैकनिदानमीशः।** 2/4/30, 5/62/9

नानाऽवतारनिकरैकनिदानमूर्तिः। 10/42/25

अद्वितीयमवतारनिमित्तमाद्यम्। 2/15/1

तत्सर्वावतारोदयः। 2/15/10

नानावतारानिह बिभ्रत् । 2/15/15, 6/18/37, 6/18/5, 2/37/24

सर्वावतारधरदिव्यविचित्रशक्तिः। 2/41/53, 9/12/30

एकोऽवतारनिकरोदयहेतुरेव त्वं हेतुहेतुरखिलासुभृतां नियन्ता। 3/7/34

त्वामवतारबीजं सर्वेश्वरेशं। 3/9/69

नानावतारनिकरैकनिदानमाद्यः। 3/18/51, 4/8/1

सर्वावतारैकनिमित्तमाद्यम्। 3/71/77

## अत्रेमे सर्वावतारहेतुसन्दर्भाः

### आदि आचार्य रघुवीरजी महाराज, श्रीहरिलीलाकल्पतरु

**सर्वावताराणां हेतुः।** 1/7/16, 2/13/29, 2/42/10, 2/58/52, 3/3/53, 4/46/48, 4/51/16, 6/29/54, 7/17/14, 7/63/43, 8/13/22, 8/29/9, 8/54/53, 9/14/27, 9/27/50, 9/27/59, 9/34/48, 10/2/14, 10/43/24, 10/45/5, 11/35/21, 11/42/16, 11/50/22, 11/51/19, 12/9/1, 12/10/2

**अवतारहेतुः** -1/1/33, 2/10/1, 2/12/24, 2/15/13, 2/19/27, 2/49/63, 3/4/61, 3/10/43, 3/11/62, 7/11/48, 7/21/1, 7/38/41, 8/23/31, 8/49/4, 8/49/45, 8/54/23, 8/56/10, 8/59/14, 9/7/10, 9/28/32, 9/29/38, 7/46/34, 9/25/18, 9/27/72, 9/31/11, 9/31/26, 9/31/43, 9/34/31, 9/36/47, 10/4/32, 10/32/46, 10/40/19, 10/42/31,11/1/1, 11/1/31, 11/5/26, 11/7/20, 11/10/36, 11/28/29, 11/28/40, 11/28/63, 11/36/30, 11/37/21, 11/43/34, 11/49/23, 11/50/37, 11/60/41, 12/10/94, 12/12/15

**दुर्गपुरमाहात्म्य-** 6/53, 7/30, 12/24, 42/57, 45/44, 47/1,10, 48/43, 49/38, 71/23, 72/37, 59/26, 62/24,41, 69/30, 71/23, 72/37, 77/11, 8/33, 82/60, 83/17, 85/16, 89/20, 90/50, 101/35, 106/19, 149/26, 113/27

राजन्नवतारैकहेतुताम्। 2/12/8, 9/20/14, 11/28/50, 11/44/15, 12/11/5

निखिलाविभविहेतुं परं। 1/25/44, 4/34/24

सकलाविभविहेतुः। 3/11/51

- पण्डितः कृष्णवल्लभाचार्यश्चास्मिन् विषयेऽत्र हरिवाक्यसुधासिन्धोर्ब्रह्मरसायनभाष्येऽलिखत् — "हेतुरिति। सोहं साकारसगुणो भगवान् धामस्थः स एव श्रीहरिः सर्वेषामाविर्भावानां वासुदेवादीनां रामकृष्णादीनामवताराणां... मूलस्वरूपो वर्तते, अवतरति संकोचेन सृष्ट्यादौ प्रविशति तत्तत्सृष्टिस्थ-जीवादिसममूर्तिवेषेणेत्यवतारः, अवताराणामवतरणनिदानमाश्रयाधारोपादानतत्त्वमवतारी श्रीहरिरेवाऽक्षर-धामस्थः परब्रह्म परमात्मा, इतीत्थं ज्ञेयः, अवतार्येव ज्ञातव्यः परिपूर्णो ज्ञातव्यो न तु तदवतारतुल्यो-ऽन्यावतारैस्तुल्यो ज्ञातव्यः। (कृष्णवल्लभाचार्यः, *श्रीहरिवाक्यसुधासिन्धोः ब्रह्मरसायनभाष्यम्*, तृतीयखण्डः, १४२. १४. पृ. ८५.)
- यद्यपि स्वयं ब्रह्मपुराधीशोऽवतारी पुरुषोत्तमोऽनन्ताक्षरमुक्तोपासितचरणाब्जोऽस्त्यथापि नृनाट्यशोभनायेष्टदेवत्वेन श्रीकृष्णस्य स्वेन स्वीकृतत्वात्तस्य सर्वावतारमहत्त्वाच्च स्वकीयं पुरुषोत्तमत्वं तत्रारोप्योपासनाप्रदर्शनार्थमाह। (शतानन्दमुनिविरचितः *(श्री)हरिवाक्यसुधासिन्धुःरघुवीराचार्यविरचित सेतुमालाटीकोपेतः*, १२२.२३. पृ. २९७.)
- पुरुषो नाम चेतनः, तत्र विशेषत्वं नाम–सर्वज्ञत्वस्य सर्वनियन्तृत्वस्य सर्वेशनशीलत्वस्य च पराकाष्ठा सर्वनियन्तृत्वस्य–उत्तमत्वमिति यावत्। भवति च परब्रह्मणो ब्रह्ममहामुक्ता–दिसर्वेषामीशनशीलत्वं सर्वापेक्षया सर्वज्ञत्वञ्चेति, अतः पुरुषोत्तम इति परमात्मा ख्यायते"(कृष्णवल्लभाचार्य्य *स्वामिनारायणभाष्यसहितं योगदर्शनम्*, १.२४. पृ. ९७.४८)